उपशास्त्री-I खण्ड साहित्य - तृतीय - पत्रम्
रघुवंश महाकाव्यम्
द्वितीयः- सर्गः

Saathi

Date __/__/__

प्र०(1) - एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके सिंहः राजा दिलीपं प्रति कथयति - चतुर्भिः श्लोकैः एवं वक्तव्यमुक्त्वा मृगेन्द्रः तूष्णीमभवत् । ततो हिमालयपर्वतोऽपि गुहागत सिंहवाक् - प्रतिध्वनिना सिंहोक्तमेवार्थं प्रेम्णा राजानं प्रति अनुमोदितवानिति भावः ।

व्याख्या - मृगेन्द्रे = मृगराजे, सिंहे, एतावत् = इयन्मात्रम्, उक्त्वा = कथयित्वा, विरते = निवृत्ते सति, गुहागतेन = कन्दरोत्थितेन, अस्य = मृगेन्द्रस्य, प्रतिस्वनेन = प्रतिध्वनिना, शिलोच्चयः = पर्वतः, अपि = पुनः, प्रीत्या = प्रेम्णा, तमेवार्थं = सिंहोक्तमेव प्रयोजनम्, क्षितिपालं = पृथ्वीपालम्, राजानं दिलीपम्, अभाषतेव = उवाचेव ।

Renu Devi
21/09/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

उपशास्त्री खण्ड साहित्य - तृतीय-पत्रम
रघुवंश महाकाव्यम्-द्वितीयः सर्गः

Date ___/___/_____

प्र० (1) निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ॥

उत्तरम् — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश-महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके सिंहः राजा दिलीपं प्रति कथयति - सिंहाधिष्ठानत्रस्त लोललोचनया तया गवा नन्दिन्या कातरं निरीक्ष्यमाणो राजा दिलीपः सिंहस्य पूर्वोक्तां वाणीमाकर्ण्य तं पुनरपि प्रतिजगाद।

व्याख्या:- देवानुचरस्य = शिवकिङ्करस्य, सिंहस्य, वाचं = पूर्वोक्तां वाणीम्, निशम्य = श्रुत्वा, तदध्यासितकातराक्ष्या = सिंहाक्रमण-भयतरललोचनया, धेन्वा = गवा नन्दिन्या, निरीक्ष्यमाणः = नितरां विलोक्यमानः, सुतराम् = अत्यन्तम्, दयालुः = कारुणिकः, मनुष्यदेवः = नराधिपः, पुनः = भूयोऽपि, उवाच = सिंहं प्रति आबभाषे।

Renu Devi
21/09/20
राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया

शास्त्री-I खण्ड साहित्य
अभिज्ञानशाकुन्तलम्

Date ___/___/___

प्र० (1) — अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य काव्यस्य चतुर्थोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके महर्षि कण्वः शकुन्तलां प्रति स्वस्नेह प्रकटयति —

— अथ केनापि विश्वस्तेन पुंसा स्वान्तिके न्यासीकृतं धनं भूयः स्थापकाय प्रत्यर्पणे हृदये वैशद्यमिवाद्यात्मीयमपि कन्यारत्नरूपं धनमुद्वोढुः समीपे संप्रेष्य ममान्तरात्मा नितरां प्रसन्नो जात इति कथयति महर्षिः कण्वः कन्येति ।

व्याख्या — हि = निश्चये कन्या = स्वकीयापि दुहिता परकीया एव, परस्यायं परकीयः परसम्बन्धी एव अर्थः = धनम् उत्पत्त्यनन्तरमेव कन्यारूपोऽर्थः परकीयत्वेनैव ज्ञातः । अतः तां = कन्याम् अद्य = इदानीम् परिग्रहीतुः - परिणेतुर्वरस्य राजर्षेः दुष्यन्तस्य पार्श्वे संप्रेष्य = प्रस्थाप्य अयम् = एषः मम = मुनेः अन्तरात्मा आभ्यान्तर मनः प्रत्यर्पितः = स्थापकाय प्रदत्तः न्यासः = पूर्वविश्वासेन स्थापितः द्रव्यादिरूपः निक्षेपः येन स प्रत्यर्पितन्यास इव = यथा प्रकामं = अत्यधिकम् विशदः = चिन्ताद्यागमनेन निर्मलः जातः = अभूत् ।

अत्रोपमा-काव्यलिङ्गोत्प्रेक्षा लङ्काराः छन्दश्चोपजातिरस्ति

Renu Devi
21/09/20
राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया ।

Page No.

शास्त्री-प्रखण्ड साहित्य
रघुवंश महाकाव्यम्
त्रयोदशः सर्गः

Date __/__/__

प्र० (1) - रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ।
अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तवक्त्राभरणं बभूव ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकविकालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति आदिवराहेण रसातलादुद्धृतायाः पृथिव्याः प्रवृद्धं समुद्रजलं क्षणमात्रं मुखावगुण्ठनमिवाजायतेति भावः ।

व्याख्या - आदिभवेन = पुरातनेन । पुंसा = पुरुषेण, भगवता आदिवराहेण । रसातलात् = पातालात् । प्रयुक्तोद्वहनक्रियायाः = कृतोद्धरणकार्यायाः । भुवः = पृथिव्याः । प्रलयप्रवृद्धम् = कल्पान्तसमृद्धम् । अस्य = समुद्रस्य । अच्छम् = स्वच्छम् । अम्भः = जलम् । मुहूर्तवक्त्राभरणम् = क्षणमात्रमुखावगुण्ठनम् । बभूव = अजायत ।

Renu Devi
21/09/20
राधा उमाकांत सं० महावि० सुखसेना,
पूर्णिया ।